N.A.
Pashupat tāntra
पाशुपत तंत्र
Sanskrit
Paper - Handwritten
N.A. but very old
30 Folio
13.8" X 5.4"
Complete

॥पाशुपततंत्रं लिख्यते॥

पा॰शु॰ श्रीचिंतामणिगणपतयेनमः॥ ॥श्रीसदाशिवायनमः॥ ॥पाशुपत्यादितंत्रेषुप्र

१ णिपात्यसदाशिवं॥ संप्रणम्यप्रवक्ष्यामिवीरशैवप्रकाशिकां १ इहखलुपरमकारुणिको

विराट्रूपःपरंज्योतिर्निर्विकल्पोनिराकारःपरशिवः स्वांशभूतान्ब्रह्मविष्णुमहेश्वरान् स

म्यगुत्पाद्यतत्रचअत्यंतानुसदाशिवमाकार्यतंप्रतिइत्थमुपादिशत्॥ किमितिपदार्थोद्वि-

विधः॥ स्वतंत्रोऽस्वतंत्रश्चेतितत्रस्वतंत्रोऽप्यहमेव॥ अस्वतंत्रश्चेतनोचेतनश्चेतिद्विविधः

तत्रापिचेतनोनित्यमुक्तः नित्यसंसारिभेदाद्विविधः॥ तत्रनंदिभृंग्यादयस्तथैकाक्षराद

मः॥ प्रमथगणांताश्चेतनाः नित्यमुक्ताः नित्यसंसारिणस्तुसृष्टिस्थित्यंतकर्तारोब्रह्मा

विष्णुमहेशादयोमनुष्यांतास्तान्सर्वान्मन्मुखोद्भूतान्नाष्टाविंशत्यागमेषुअसुरमोह- १

कवेदविरुद्धान्दर्शनोपागमान्विहायसकलवेदार्थनिर्णायकाष्टादशसदा-

गमोक्तमकारेणममसद्योजातादिपंचमुखोद्भूतैः॥कृतयुगेएकाक्षरद्व्यक्षरत्र्यक्षरच
तुरक्षरपंचाक्षरेतिनामसमेतैःपंचाचार्यैर्ब्रह्मादिसर्वदेवतागणान्नीलमयलिंगं
धारयित्वापंचाक्षरमंत्रमुपदिश्यमोक्षमार्गमदर्शयत॥त्रेतायांएकवक्त्रद्विवक्त्र
त्रिवक्त्रचतुर्वक्त्रपंचवक्त्रेतिनामसमेतैस्तैरेवपंचाचार्यैः॥कौशिककाश्यपवशिष्ठादिन् शि
ऋषिगणान्सर्वान्मनून्यक्षगंधर्वकिंनरान्सर्वानपिरत्नमयलिंगंधारयित्वापंचाक्ष
रमंत्रमुपदिश्यमोक्षमार्गमदर्शयेत्॥द्वापरेदारुकशंकुकर्णरेणुकधेनुकर्णविश्वक
र्णेतिनामसमेतैस्तैरेवपंचाचार्यैः॥षोडशमहाराजान्हरिश्चंद्रनलपुरुकुत्सपुरू
रवादिन्तथैवराक्षसगणान्सर्वान्वज्रमयलिंगंधारयित्वापंचाक्षरमंत्रमुपदि
श्यमोक्षमार्गमदर्शयेत्॥कलियुगेमरुलाराध्यएकोरामाराध्यरेणुकाराध्यपंडिता

भु॰ राध्याविश्वाराध्येतिनामसमेतैः स्तैरेव पंचाचार्यैर्ब्राह्मणक्षत्रियवैश्यशूद्रमुखान् चातुर्वर्णान् अष्टा
दशजातीन् एकशतक ॰ जान् मनुष्यान् शिलामयलिंगं धारयित्वा पंचाक्षरमंत्रमुपदिश्य मो
क्षमार्गं प्रदर्शयेत्॥ इतिसाक्षात्सरं ज्योतिः परशिवः कार्यं रुद्रमुपादिशत्॥ तदुक्तक्रमेणैव
प्रवर्तनिशीलो महादेवः पार्थ तेनस्सभाषत्॥ श्रीमत्कैलासशिखरे भासमानं निरामयं॥ र
त्नसिंहासने सम्यगारूढं च सदाशिवं॥१॥ त्रिलोचनं चतुर्बाहुं तडित्कोटिसमप्रभं॥ अनंता
दित्यसंकाशं शुद्धस्फटिकसन्निभं॥२॥ नीलग्रीवं शशांकांकं खड्गखट्वांगधारिणं॥ नाग
यज्ञोपवीतं च व्याघ्रचर्मोत्तरीयकं॥३॥ कमंडलुधरं देवमक्षमालाविभूषितं वरदाभयह
स्तं च नमज्जनवरप्रदं॥४॥ वृषभोपरिसंरूढं उमादेहार्धधारिणं॥ दुर्दांतकपिलजटं शि
रवामध्योदकारिणं॥५॥ अमृतेनाप्लिंहृष्टं दिव्यभोगसमन्वितं॥ दिग्देवतासमायुक्तं सु

रासुरनमस्कृतं ॥६॥ नित्यंचशाश्वतंशुद्धं ध्रुवमक्षरमव्ययं ॥ सर्वव्यापिनमीशानं रुद्रंवैवि

श्वरूपिनं ॥७॥ एतादृशंमहादेवं गिरिजासमभाषत ॥ भगवन्श्रोतुमिच्छामिममरक्षितुमर्हसि ॥

ब्रह्माविष्णुमहेशानांमध्येकःप्रवरोभवेत् ॥ कःसर्वज्ञःस्वतंत्रःकोजगत्स्रष्टाचकोभवेत् ॥

॥८॥ जगत्पालनशीलःकोजगतामंतकश्चकः ॥ किमर्थंचजगत्सृष्टंकःकःकंमसिंसृजे सं

त् ॥१०॥ एवंगिरिजयापृष्टंकिंचिद्धास्यमुखंशिवः ॥ समाचष्टेपुरावृत्तंपाशुपत्सागमोदि ×

तं ॥११॥ ईश्वरउवाच ॥ अहमेवपरंब्रह्मनिर्गुणश्चनिराकृतिः ॥ अप्रमेयःप्रमेयात्मानि

रालंबोनिराकुलः ॥१२॥ निष्किंचनश्चनिर्वैरोप्यवाङ्मानसगोचरः ॥ विराड्रूपःस्वरम

यःस्वतंत्रःसर्ववित्स्वयं ॥१३॥ परंज्योतिःस्वरूपस्यममभेदोनविद्यतेतेनैवसंयुतःसो

हमसृजंसुरयूथपान् ॥१४॥ अन्यान्मनून्वसूंश्चैवसृष्टवान्गणदेवताः ॥ विद्याधरोप्स

पु॰ तं॰
२

यक्षरक्षोगंधर्वकिंनरान् ॥१५॥ पिशाचान् गुह्यकान् दनुजेंद्रानसीसृजं ॥ ब्राह्मणोस्यमुख
मासीत् ॥ मूलरूपेण संसृष्टा मुखतो ब्राह्मणा इमे ॥१६॥ बाहू राजन्यः कृताः ॥ बाहुभ्यामथ
राजन्यः ॥ उरू तदस्य यद्वैश्यः ॥ उरुभ्यां वैश्य सत्तमाः ॥ पद्भ्यां शूद्रो अजायत ॥ पद्भ्यां शू
द्राश्च संसृष्टाः ॥ चंद्रमा मनसो ॥ मनसा मृगलांछनः ॥ जातश्चक्षोः सूर्यो अजायत ॥
अक्ष्णोर्दिवाकरश्चैव ॥ मुखादिंद्रश्चाग्निश्च ॥ इंद्राग्नि मुखतश्चमे ॥ प्राणाद्वायुरजायत ॥
प्राणाद्वायुसमुत्पन्नो ॥ नाभ्यां आसीदंतरिक्षं ॥ नाभ्यांचैवांतरिक्षकं ॥१८॥ शिरसो
द्यौः समवर्तत ॥ शीर्षेणैव द्यौलोकश्च ॥ पद्भ्यां भूमिर्दिशः ॥ पादाभ्यां भूमिरेव च ॥ श्रोत्रात
था लोकानकल्पयन् ॥ श्रोत्राद्दिशः समुत्पन्नाः तथा लोकानकल्पयन् सीसृजं ॥१९॥ सत्व अ
तः सुरमुख्यांश्च रजः षिष्वापि तपोधनान् ॥ राज्ञो गुणाच्च राजन्यान् तमसोप्यसुरानपि ॥२०॥

समहारान्मानवांश्च मद्रंगे स्तथापरान् ॥ अष्टादशकुलान्येक शतसंख्याकुलानपि ॥२१॥

तत्र संसारिणः केचिन्निसमुक्ताश्च केनचे ॥ ममपंचमुखानीति संजातानिवराननने ॥२२॥

सद्योजातश्च प्रथमो वामदेवो द्वितीयकः ॥ अघोरश्च तृतीयस्तु तत्पुरुषश्च चतुर्थकः ॥२३॥

ईशानः पंचमश्चेति मुखानि मम सर्वशः ॥ तान्याननानि गोत्राणि वेदोक्तानि नसंशयः ॥२४॥

नंदीभृंगिस्तथावीरो वृषभस्कंद एवच ॥ मत्स्वरूपात्समुत्पन्नाः पंचगोत्राधिकारिणः ॥२५॥

दारुकः शंकुकर्णश्च रेणुकोधेनुकर्णकः ॥ विश्वकर्णश्च पंचैते पंचगोत्रसमुद्भवाः ॥२६॥ एते

षां मतिनामानि युगभेदेन सर्वशः ॥ एकाक्षर द्व्यक्षरश्च त्र्यक्षरश्चतुरक्षरः ॥२७॥ पंचवक्रेश्च १८

पंचैते त्रेतायां समुदाहृताः ॥ द्वापरे दारुकश्चेति शंकुकर्ण द्वितीयकः ॥२८॥ रेणुकस्तु तृ

तीयश्च धेनुकर्णश्चतुर्थकः ॥ विश्वकर्णश्च पंचैते पंचनामानि सर्वशः ॥२९॥ मरुलश्चैक

भा०तं.
९

रामश्वरेवणःपंडितस्तथा ॥ विश्वाराध्यइतिप्रोक्ताः कलौपंचगणेश्वराः ॥३०॥ वीरशैवमतोद्धा
रहेतवःपंचमातपि ॥ म[illegible]भ्यःसमुत्पाद्यतेरेवाकर्षमंजसा ॥३१॥ तेषांनामानिगोत्राणि
सूत्रदंडकमंडलुन् ॥ मंत्रबीजंचप्रवरंकंथावर्णेतथाशके ॥३२॥ प्रत्येकंचप्रवक्ष्यामिप्र
तिनामानिचश्रुणु ॥ सद्योजातमुखोत्पन्नोदारुकःपरिकीर्तितः ॥३३॥ तन्नामप्ररुलारा
ध्यस्तस्यसूत्रंचवृष्टिकं ॥ प्रवरोवीरशैवेति अतिवर्णश्चवर्णकः ॥३४॥ तस्यदंडश्चपाला
शस्तथाताम्रकमंडलुः ॥ नकारोमंत्रबीजंचशकोदारुकईरितः ॥३५॥ कलशस्तस्य
ताम्रश्चसद्योजातमुखंतथा ॥ तस्यकंथाचमांजिष्ठा लक्षणंनंदिगोत्रिणां ॥३६॥ वामदेव
मुखोत्पन्नःशंकुकर्णेतिनामतः ॥ एकोरामेतितन्नामतस्यसूत्रंचलंबकं ॥३७॥ प्रवरो
वीरशैवेतिअतिवर्णश्चवर्णकः ॥ वेणुदंडतस्यदंडलधाकांस्यकमंडलु ॥३८॥ मकारोमं

त्रबीजं च शंकुकर्णशकः स्मृतः ॥ कलशस्तस्य कांश्यश्च वामदेवमुखं तथा ॥ हरिद्वर्णा तस्य कंथा ल
क्षणं भृंगिगोत्रिणां ॥ अघोराख्यमुखोसन्नो रेणुकः परिकीर्तितः ॥ तन्नाम रेवणाराध्यः सूत्रं
पडवजीस्यपि ॥४१॥ वीरशैवेति प्रवरो ह्यतिवर्णश्च वर्णकः ॥ कमंडलुश्च रजतं अश्वत्थो दंड
ईरितः ॥४२॥ शिकारो मंत्रबीजं च रेणुकोशकईरितः ॥ राजतः कलशस्तस्य ह्यघोरमुखमी
रितं ॥४३॥ तस्य श्वेतमयी कंथा लक्षणं वीरगोत्रिणां ॥ तत्पुरुषमुखोसन्नो धेनुकर्ण इतीरि
तः ॥४४॥ तन्नाम पंडिताराध्यस्तत्सूत्रं मौक्तिगुच्छकं ॥ प्रवरो वीरशैवेति अतिवर्णश्च वर्णकः ॥
न्यग्रोधस्तस्य दंडोस्ति लोहं तस्य कमंडलुः ॥ वकारो मंत्रबीजं च गोकर्णशकईरितः ॥४६॥
कलशस्तस्य लोहं स्यात्तत्पुरुषमुखं स्मृतं ॥ तस्य कंथा च कापोति लक्षणं वृषगोत्रिणां ॥४७॥
ईशानाख्यमुखोसन्नो विश्वकर्णेति विश्रुतः ॥ विश्वाराध्यश्च तन्नाम तत्सूत्रं पंचवर्णकं ॥
॥४८॥

वीरशैवेतिप्रवरोह्यतिवर्णश्चवर्णकः॥ दंडोबिल्वइतिप्रोक्तः सौवर्ण कमंडलुः॥४९॥ य
कारोमंत्रबीजंचविश्वकर्णशकस्मृतः॥ कलशस्तस्यसौवर्णोमुखमीशानमीरितं॥५०॥
तस्यकंथापीतवर्णारुद्राक्षंस्कंदगोत्रिणां॥ एतेषांपंचगोत्राणिभिन्नभिन्नान्यसंश
यः॥५१॥ एकैकस्यगोत्रस्यशाखासूत्रादिकंपृथक्॥ यस्यगोत्रस्ययाशाखायत्सूत्रंयः
कमंडलुः॥५२॥ याकंथायश्चदंडश्चगुरुस्तैश्चसमन्वितः॥ एवमेवहिपंचानांगोत्राणां
गुरुरीरितः॥५३॥ सएवपीठाधिकारीआराध्यश्चसएवहि॥ आचार्यश्चसएवास्ति
सिंहासनपतिश्चसः॥५४॥ एतानिपंचनामानिपंचानांसूत्रिणांपृथक्॥ महा त्र सू
स्यचैकस्यह्युपसूत्राणिद्वादश॥५५॥ तेषामप्युपसूत्राणांपंचनामानिसंतिवै॥
सिंहासनपतित्वंचनास्तितेषांकदाचन॥५६॥ ॥पार्वत्युवाच॥ ॥भगवन्

श्रोतुमिच्छामि शैवानां भेदमादरात् ॥ तेषां तेषां लक्षणानि तैस्तैः कार्यं तथैव च ॥ ५७ ॥ ए
कश्च वीरशैवश्च चतुर्विधमभूत्कथं ॥ चतुर्विधानां भेदस्तु तैस्तैः कार्यं च मे वद ॥ ५८ ॥ इ
ति संप्रार्थितः शंभुस्तत्प्रभेदं प्रचक्रमे ॥ ॥ ईश्वर उवाच ॥ ॥ आदिशैवं द्विधा
प्रोक्तं शैवतंत्रेषु निश्चितं ॥ शैवं वीरशैवमिति शैवं सप्तविधं स्मृतं ॥ चतुर्विधं वीरशै
वं अनादिशैवमेव च ॥ ६० ॥ आदिशैवं महाशैवं अनुशैवमतः परं ॥ अवांतर
च शैवमिति प्रवरं शैवमेव च ॥ ६१ ॥ अनंतरशैवमिति सप्तधा परिकीर्तितः ॥ अह
मेव परं ब्रह्म मत्तः सर्वोत्तमो न हि ॥ ६२ ॥ इति निश्चितवान् यो सौ अनादिशैव उच्य
ते ॥ पंचाक्षरी दीक्षितो यः स आदिशैव उच्यते ॥ ६४ ॥ शिवस्य मुखरूपं यो ध्यात्वा म
नसि पूजयेत् ॥ महाशैव इति प्रोक्तः परसंज्ञकलिंगकं ॥ ६५ ॥ यो सौ समर्चयेन्नित्यं अ

पा.तं.
६

नुशैवमितिस्मृतं॥परमेशस्यस्वरूपोयोभेदाभेदविवर्जितः॥६६॥योसौसमर्चयेन्नि
त्यंअवांतरःशैवईरितः॥परस्यमूर्तिमाक्वावयविसर्जनपरश्चयः॥६७॥मचरःशैव
इत्युक्तःसर्वतंत्रेषुतत्वतः॥परस्यलांछनंदृष्ट्वानमस्कृत्यससुनिश्चितः॥६८॥अ
नंतरःशैवइतिसमानोलक्षणंत्विदं॥पुनरेवहिशैवोसौचतुर्विधमनंतरं॥६९॥वा
मदक्षणमिश्रेतिसिद्धांतेतिचतत्वतः॥शक्तिःसर्वोत्तमायत्रतद्वामइतिकथ्यते॥७०॥
यत्रोत्तमोभैरवोभूद्दक्षिणःपरिकीर्तितः॥समत्वमात्मपरोयुक्तमिश्रमित्यभिधीय
ते॥७१॥शिवःसर्वोत्तमोयत्रसिद्धांतोवीरशैवकः॥सएवमुक्तःसोपानंशैवतंत्रेषुनि
श्चितः॥७२॥शापदग्धदुराचारदुर्बुद्धीनांचदुर्लभः॥सिद्धांतोवीरशैवस्यास
पुनश्चतुर्विधः॥७३॥धर्मार्थकाममोक्षेतियथामुक्तेश्चतुर्विधः॥सामान्यवीरशैवे

वीरशैवमतःपरं ॥७४॥ विशेषवीरशैवेति निराभारीतथैवच ॥ यथाक्षीरेतत्र दधिनवनीत
घृतादिकं ॥७५॥ एकैकस्याधिकोभूत्वाएकैकस्यगुणंपृथक् ॥ प्रदर्शयित्वातत्प्रत्येते सर्वेए
कीभवंतिहि ॥७६॥ तथैववीरशैवोसौव्यवहारिकभेदवान् ॥ एकस्यकर्मचैकस्य
नचेद्पितथैवच ॥७७॥ एकस्मिन्नपिचैकस्य मिश्रभावेनचेद्पि ॥ चतुर्णामपिमुक्तो
तुगतिरेकानसंशयः ॥७८॥ तस्मा च्चवीरशैवोसौ सर्वोत्कृष्टोभवेच्चसः ॥ परब्र
ह्ममुखोद्भूतपंचवक्त्रैर्लिभिरेवच ॥७९॥ दीक्षांप्राप्यात्साश्रमिसन्गुरुजंगमलिंग
कान् ॥ शैवइत्वायथाशक्तिशिवार्चनपरोभवेत् ॥८०॥ स्वयंदानपरोपरस्तुसामान्यो
वीरशैवकः ॥ परब्रह्मस्वरूपेषु सद्योजातादिपंचसु ॥८१॥ मुखेषुजनिताचार्येर्दीक्षि
तोसाश्रमीचसः ॥ लिंगप्राणमितिज्ञात्वापाशुपसादिकर्मसु ॥८२॥ सुनिष्ठितेपरब्र

पा॰तं॰
७

ह्मपूजायां तत्परश्च सः ॥ स एव वीरशैवेति मथितस्तत्र निश्चितः ॥ ८३ ॥ परस्य ब्रह्मणः पंचमु
खेषु इतपंचके ॥ आचार्यैर्दीक्षितो भूत्वा पंचमुद्रांकितश्च ‌ ‌ यः ॥ ८४ ॥ महावैराग्यशा
लीच संभातमनुभूय च अमात्ते निरपेक्षसन् सोहं ब्रह्मेति निश्चितः ॥ ८५ ॥ इत्युक्तो लोकि
काचारा विशेषो वीरशैवकः ॥ विराट् स्वरूपभगवन् ब्रह्मणो मुखपंचमात् ॥ ८६ ॥ समुद्भु
ते दीक्षितो यो हृद्रीकृतमलत्रयः ॥ षट्स्थलांतपरब्रह्म सोहमेवेति निश्चितः ॥ ८७ ॥ मुक्तिमार्गेषु
संस्थित्वा लोकिकाचारवर्जितः ॥ निष्प्रपंचो जगत्सृज्यो रागद्वेषादिवर्जितः ॥ ८८ ॥ स एव चानि
राभारी वीरशैव इतीरितः ॥ इतस्ततस्त्वभेदं च तत्र लक्षणमेव च ॥ ८९ ॥ तैस्तैः कार्यमवक्ष्यामि सा श्रीशिव
वधानमनाश्रुणु ॥ सामान्य वीरशैवानां लक्षणं वक्ष्यते मया ॥ ९० ॥ पंचाक्षरी मंत्रयुतो भस्मरुद्रा
क्षचिन्हितः ॥ शुद्धांतःकरणश्चैव गुरुदत्तेष्ट लिंगवान् ॥ ९१ ॥ तदन्यं लिंग विष्ण्वादिदेवतास्वप्य

नु

नादरः॥स्वगोत्रप्रवरो निष्टो गुरौ तनु समर्पकः॥९२॥भूरुद्रेषु धनं चैव इष्टलिंगे मनस्तथा यथानु
सारतो दत्वा निर्वंचनपरो भवेत्॥९३॥सङ्गकृश्च शिवेच्छा शिवध्यानपरायणः॥शिवानुकूलव्या
पारी शैवश्रवणतत्परः॥९४॥इत्याष्टविधाभक्त्याचसंयुतः सात्विकः सदा॥शिवः सर्वात्मकः स
र्वेष्वंतरात्मा नरा वच॥९५॥इति बुध्वा पुराणेषु स्वमतानुगुणेषु च॥कर्मस्वाचार्यो दितेषु परमा
णः शिवो गुगः॥९६॥इष्टलिंगपतिश्चैव गुरुरेव पितामम॥भूरुद्रस्तु स्वदैवानि इत्थं मनसि नि
श्चितः॥९७॥स्वगोत्रादन्यगोत्रेषु चतुर्ष्वेव वि वाहवान्॥प्रमादादिष्टलिंगं तु चोराद्यपहृतं भवे
त्॥९८॥तदा त्वघोरमंत्रं तु लक्षं जप्त्वा ततः शुचिः॥ततश्चतुर्भिराचार्यैर्युक्तेन गुरुणा ततः॥९९॥
दत्तं लिंगं गले धृत्वा पुनरष्टोत्तरं शतं जप्त्वा तु शैवगायत्रीं शुचिर्भूत्वा ततः परं॥१००॥आचार्य
पादोदकं तस्मात् सादरं स्वीकार्य निर्माल्यधरः स्वशीर्षे॥तुर्याश्रमाणामयमेव धर्मस्तथा परेषां न हि

नास्तिकानां ॥१॥ पापासपाषंडकवेदबाह्याः संस्कारहीना अपि शापदग्धाः ॥ तेषामिदं कर्म न
चोदितं मुदा सदा शिवेनोदितमत्रमानं ॥२॥ इति बुध्वा पूर्वरीत्या शुद्धांतःकरणो भवेत् ॥ हस्तम
स्तकसंयोगाद्गुरुणा भस्मधारणं ॥३॥ शिवमंत्रोपदेशेन लिंगांगी च भवेत्तदा ॥ भवी स्त्रिसंगर
हितः कंठवक्षस्स्थलादिषु ॥४॥ लिंगं बध्वा त्रिकाले पुजपस्नानपरायणः ॥ प्रसूति दीक्षा सुत
तानी वा हे श्राद्धे महापर्वणि पुण्यकाले ॥ शयादिस्थापनमुख्यकार्ये हित्वास पर्यासमुद्भवां
श्च ॥६॥ न कर्मकर्त्ता भवति प्रसिद्धे गुरौ च लिंगे पि च जंगमे च ॥ तस्माद्दतीर्थादि शुभक्तियुक्तः स
दा सदाचारसमाहितात्मा ॥७॥ स्वगृहे गर्भिणि जाता भार्या पुत्री तथानुजा ॥ तासामाचार्यमु
ख्येश्च मंत्रोक्तविधिना ततः ॥८॥ कुक्षौ भस्मांचितं कृत्वा रेखात्रितयसंभवं ॥ त्रिमासे पि च ष
ण्मासे नवमासे तथैव च ॥९॥ झीर्भोदये तथा लिंगं बध्वा नालं समुछिनेत् ॥ पंचवर्षे तथा कु

यादीक्षांशास्त्रोक्तमार्गतः ॥१०॥ दंपत्योरेकनिष्ठत्वमेकदेवार्चनं तथा ॥ उभयोरेकशीलत्वमे
कं कर्मव्रतादिकं ॥११॥ उभयोरेकवर्णत्वमेकमंत्रे सुनिष्ठिता ॥ भविमक्तेषु भिन्नत्वं भविसंप
र्क वर्जनं ॥१२॥ भूरुद्रशेवासंकल्पयुक्तो भवति निश्चितः ॥ पंचसूत्रेराहिसोगुरौ जंगमलिं के ३
गयोः ॥१३॥ गुणं कुलं शीलभावं तीर्थं संदेहमेव च ॥ प्रसादेपि च संकल्पं रुद्राक्षे न्यूनतां त्यजेत् ॥१४॥
मंत्रेषु भुक्तिताभावमकल्पं च समाहितः ॥ अत्याश्रमिकर्मकांडि सामान्यो वीरशैवकः ॥१५॥ अ
थवक्ष्ये वीरशैवलक्षणं मोक्षदायकं ॥ ललाटे भस्मरेखाभिस्त्रिस्रभिः संविराजितः ॥१॥ पंचा
क्षरिजपासक्तः षड्विधस्नानतत्परः ॥ पीठाचार्यैः संधृतेष्टलिंगब्रह्मसमायुतः ॥२॥ शिखासू
त्रजटाभस्मशिवलांछनलांछितः ॥ गोत्रसूत्रवर्णशाखाप्रवरादिविनिर्णये ॥३॥ अन्यगो
त्रपरित्यागी स्वगोत्रेष्वेवतत्परः ॥ खेटखड्गादिरहितः स्वदारादिव्रतान्वितः ॥४॥ पाशुप

सागमेनेवसव दामुख्यजीवना॥ येशिवाचारसंयुक्तास्तेष्वेवाभिरतःसदा॥५॥ शिवाचा
रविहीनेषुप्रवृत्तिपरिवर्जितः॥ दुष्टान्निगृह्यशिष्टानांपरिपालनतत्परः॥६॥ गुरुरेवशरीरंमे
लिंगंमेमनएवतत्॥ धनंमेजंगमाएवआचारःप्राणएवसः॥७॥ एवंमनसिनिश्चित्यवर्त्त
मानश्चनिस्पृहः॥ निषिद्धार्थपरित्यागीअन्यदेवपराङ्मुखः॥८॥ भविसंबंधयुक्तेषुह्यप्र
वृत्तिपरःसदा॥ब्रह्मण्येवसदाकामीक्रोधवान्करणादिषु॥९॥ लोभिप्रसादमुख्येषुभूरु
ड्रेषुचमोहवान्॥ अन्यवृत्तेषुमदवान्मत्सरीचशिवद्विषि॥१०॥ अष्टाविंशतिसंख्याका
पाशुपत्यागमादिषु॥ स्वमतानुगुणोपेतःसत्कर्मसुसदारतः॥११॥ स्वगोत्रान्यगोत्रेषुचतुर्ष्वे
वविवाहवान्॥ हित्वास्नानजपादीनिअगृहीतान्नपानवान्॥१२॥ मलमूत्रोत्सर्जनांतेषु
चिर्भूत्वासदाव्रती॥ पादांगुलीयवलयशामदंतादिचिन्हितैः॥१३॥ स्त्रीजातिभिःकृतान्ना

दितिरस्कारिशिवव्रती॥ दीक्षिभिर्दपत्तीभिश्चकृतनैवेद्यभोजनः॥१४॥ सामान्यवीरशैवेषुद्वि
धाश्राद्धादिकर्मसु॥ शवस्थापनकर्मादावथिष्टातानसंशयः॥१५॥ विरागिकृषिवाणिज्यव्यवहारे
षुसर्वदा॥ द्व्याशयाहीनजातोजातिभ्रष्टकुलेषुच॥ अगृहीतान्नपानादि दीक्षाकर्मसुनिष्ठितः॥
सत्यवाक्सदाचारीस्वधर्मनिरतःसदा॥ जितेंद्रियपरोभूत्वाजगद्विरतकीर्तिमान्॥१७॥ अ
तिथिश्चनिराभारान्दृष्ट्वासंरक्षणेपरः॥ लुप्तव्रतशिवाचारदंडशिक्षादितत्परः॥१८॥ इष्टलिं
गयुतानांतुपितृवत्परिपालकः॥ बहुलक्रिययानाल्पफलभोगीभवेच्चसः॥१९॥ असत्यक्रियया
नेतत्फलभोगीनसंशयः॥ सदालिंगांगसंबधीलिंगभोगोपभोगवान्॥२०॥ इष्टलिंगेनचाप्स्नान्
विसर्जनपरोभवेत्॥ लिंगव्रतादिलोपेषुप्राणत्यागीनसंशयः॥२१॥ एतस्मिन्विषयेचान्यप्राय श्चि
त्तविवर्जितः॥ शिवस्यजंगमस्यापिगुरोरपितथैवच॥२२॥ पादोदकेप्रसादेच रुद्राक्षेभस्मधारणे

र्न

पा॰ ते॰
१०

शैवागमे शिवक्षेत्रे शिवाचारे तथैव च ॥२३॥ यो निंदां कुरुते तस्मिन् सहिष्णुर्भवेच्चसः ॥ विस्मवा
दिदेवताः सर्वे अगणेय्यमवर्त्तकः ॥२४॥ लिंगलांछनहीनश्च नशायासन भोजनः ॥ अनृतस्थि
त्ववाक्येषु विमलं भेच निर्दये ॥२५॥ पंक्तिभेदेष्वुदासीनो नमनोधारकः सदा ॥ दृष्ट्वा च शिवयो
गीज्ञानं प्रसुख्यानपरायणः ॥२६॥ तैः साकं प्रिय वाक्यादि तु कृत्वा दत्तासनः शुचिः ॥ अन्नपा
नादिकं दत्वा मुक्तेः सोपानसप्तकैः ॥२७॥ संयुतः पंचसूत्रादि वर्जितश्च शिवव्रतिः ॥ लिंगार्चना
दिपजनकर्त्ता कारइत्यास्वयं ॥२८॥ शैवशास्त्रोपदेशी च उपदेष्टा तथैव च ॥ शिवप्रसाददानी
चपादोदकग्रहीतथा ॥२९॥ लिंगभृत्सगणशिवसदाचारेषु पंचसु ॥ निष्ठावान्वीरदासत्वे दास
त्वादौ च षड्विधे ॥३०॥ निष्ठितः परयाभक्त्या वर्तमानः सुनिष्ठितः ॥ सुतीर्त्थलौकिकाचारेख
तंत्रः शिवधर्मवित् ॥३१॥ व्यवहारिकभेदस्तु संसारीचेति निश्चितः ॥ मुक्तोत्तभेदएवेतिसु

निश्वसमुदान्वितः ॥ ३२ ॥ असाश्रमिजगत्स्थ्योऽपिस्थः सत्कर्मकांडवान् ॥ एतादृशोवीरशै
वलक्षणैर्लक्षितःपुमान् ॥ ३३ ॥ ७ ॥ विशेषवीरशैवस्यलक्षणंवक्ष्यतेमया ॥ फालेभूतित्रि
पुंड्रंचमुखषड्वर्णसंस्मृतिः ॥ १ ॥ तत्तत्स्थानेषुरुद्राक्षधारकोज्ञानकर्मवित् ॥ परवित्तेप
रस्त्रीषुमनोनिग्रहवान्भवेत् ॥ २ ॥ दंडखंडनशिक्षासुदूरीकरणमाचरेत् ॥ अहिंसाप
रमो धर्मोइसंगीकृतमानसः ॥ ३ ॥ पूर्वाश्रमगतान्मातृपितृन्नपिपरित्यजेत् ॥ गोत्रसूत्रं
चप्रवरवर्णंचापिपरित्यजेत् ॥ ३४ ॥ स्थूलेसूक्ष्मेकारणेचशरीरेषुचसर्वथा ॥ विदित्वा
चेष्टलिंगंचप्राणभावंतथैवच आधारचक्रेस्वादिष्ठमणिपूर्वकएवच ॥ अनाहतेविशुद्धेचआज्ञ
यारव्यतथैवच ॥ ६ ॥ एवंषट्चक्रमध्येषुषड्विधांशक्तिमेवच ॥ भक्तिंषड्विधांलिंगपर्णषाड्विध्य
मेवच ॥ ७ ॥ तथादलस्यषाड्विध्यंविदित्वास्थलषड्विधं ॥ सगुणनिर्गुणंचेवतदेवेष्टंचलिंगकं ॥

ममेसन्योन्यभावेनआरवंडचज्ञानवान्भवेत् ॥ पङ्क्तेनेपंचरात्रंवात्रिरात्रंपुटभोदने ॥ ९ ॥ अदंड
यित्वाचपरमायाच्चनपरोभवेत् ॥ विमुक्ताशाद्विरागीभवेद्भूतेदयापरः ॥ १० ॥ यदृच्छिकपदा
र्थोनिस्पृहीस्वावृत्तिमाचरेत् ॥ स्त्रीभिःकृतान्नपानादिवर्जितःस्वेनपाणिना ॥ ११ ॥ कृतान्न
पानीभूत्वैवचरेद्व्रतपरायणः ॥ भक्तिभावादागसतस्यवैराग्यफलकस्यच ॥ १२ ॥ ज्ञानोप
देशंकृत्वातुसंचरेद्गवत्सरः ॥ अतिक्रांतस्यमर्यसनशीक्षाकरणाभवेत् ॥ १३ ॥ येनकेन
चमंत्रेणकंथादंडकमंडलुन् ॥ भैक्षापात्रंतथाभस्मयुटिकांपंचमुद्रिकां ॥ १४ ॥ धारये
संचमशिखांपरमानंदलसरः ॥ प्रमादादिष्टलिंगंतुयत्रकुत्रगतंभवेत् ॥ १५ ॥ नपुन
र्धारयेल्लिंगंमाणत्यागीचजोभवेत् ॥ ध्यानवानिष्टलिंगेतुमुक्ताममक्तालयेसदा ॥ १६ ॥
अन्यजातिष्वन्नहीनोजातिष्वेवान्नपानवान् ॥ भावयेत्प्राणलिंगंतुअंतरेपद्मसंस्थि

तं ॥१७॥ सुज्ञानंतस्यनालंस्यादृलं तस्याष्टमंपदं ॥ किंजल्कभूतारुद्रेशो वैराग्यंतस्यकर्णिका ॥१८॥
चंद्रप्रभे दृहृदये सोमसूर्याग्निमंडले ॥ चित्स्वरूपं दिव्यमूर्त्तिं पूजयेन्मनसा ततः ॥१९॥ चिदेव
दिव्यमूर्त्तिस्याच्चित्प्राणाश्चलयेवच ॥ आनंदमेवलावण्यं प्राणलिंगस्यचोदितं ॥२०॥ षड्
त्रिंशत्तत्वजातिषुभासमानंमुदान्वितं ॥ स्फटिकांतर्दीपमिवबाह्येचाभ्यंतरे तथा ॥२१॥
एवंविधे प्राण लिंगेचेष्टलिंगंविभावयेत् ॥ सर्वव्यापीश्वरश्चेति मतिराह्वानमेवच ॥२२॥ ज
गच्छिवपदव्याप्तमितिमज्जनपाद्यकं ॥ ईशः सुखाब्धिरेवेतिमतिरर्घ्यंप्रकीर्तितं ॥२३॥
पवित्रज्ञानमेवाभूदाचमानं प्रकीर्तितं ॥ निस्सनिर्मलरूपंतज्ज्ञानमाहुर्मनीषिणः ॥२४॥
अतिक्रम्यजगत्सर्वं अतिविद्येववाससि ॥ त्रिगुणातीतविज्ञानंयज्ञसूत्रं विदुर्बुधाः ॥२५॥
आकल्पकंतुचैतन्यमलंकारःप्रभामतः ॥ श्रृंगारःमतिभातस्यचिच्छक्तिरनुलेपनं ॥२६॥

कारुण्यमक्षदार्तस्यपुष्पंतत्प्रणवात्मकं विषयेषुचवैराग्यं धूपमि समभिधीयते॥निसत्त्रुप्रस्यसे विद्यात
न्नैवेद्यमुदीरितं॥२८॥षट्त्रिंशत्तत्त्व विज्ञानं नमस्कार क्रियोच्यते॥सोहं ब्रह्म इतिज्ञानं प्रदक्षि
णमुदाहृतं॥२९॥अंतरात्मज्ञ मिरेव तांबूल मितिकथ्यते॥इतिमानसपूजाद्यैपूजितंचेष्टलिं
गकं॥३०॥हृत्कर्णिकामध्यदेशे शून्यसिंहासनेतथा॥पूर्वाचार्यैर्दत्तमिष्ट लिंगंप्राणे विभाव
येत्॥३१॥नदीतीरेथवाग्रामे क्षेत्रेशैवालयेतथा॥आचरेन्मानसिंपूजां लौकिकौरवर्जितः॥
वृषभं भास्करं वीरभद्रं मातृगणंतथा॥स्कंदंतथाक्षेत्रपालंब्रह्माविष्णुमहेश्वरान्॥३३॥
स्वयंभूलीलयासम्यगतिक्रम्यमुदान्वितः॥प्राण लिंगस्य आसनमेकंयतत्र विभावयेत्॥
प्राणलिंगध्यानपरस्त्वितर ध्यानवर्जितः॥स्थूले सूक्ष्मेकारणे त्रिलिंगाराधनतत्परः
॥३५॥प्राणलिंगप्रसादेन विनानान्यप्रसादभुक्॥विषयासक्तिरहितो जगत्पूज्योभवे

श्री

च्चसः॥ अंतेमंत्रो क्तमार्गेणसमाधौस्थापयेत्तनुं॥ जीवन्मुक्तो तिथिःसो पिज्ञानकोडीनसंशयः॥
॥३७॥ विशेषवीरशैवोसावत्याश्रमगणोभवेत्॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥७॥
सर्वस्त्रक्चंदनादीनिवनितादिमहासुखं॥ तिरस्कृसखचितंत न्येसेपर शिवेसदा॥१॥
स्वात्मन्यैक्यंविदित्वातु सर्वसंगविवर्जितः॥ दंडकौपीनका षाय जटायोगकमंडलुन्॥२॥ धृत्वा
थवाशिरोमुंडीभूत्वावसनवर्जितः॥ अजिनासनयुक्तःसन्काषायाच्छादकश्चरेत्॥३॥ कुष्मांड
खर्परंधृत्वाभवेच्चैवंदिगंबरः॥ यहछ्यालब्धशैवप्रसादात्सादनेरतः॥४॥ कायेनवाचामनसात्यक्त
भूवित्तकन्यकः॥ सत्कारग्रहमठादीनि मनुष्यादिग्रहाणिच॥५॥ प्रवासस्तेनकर्त्तव्यो वनेगिरिगु
हादिषु॥ तृणीकृतजगज्जीवो लौकिकारवर्जितः॥६॥ त्यक्तप्रवरगोत्रश्चसूत्रवर्णादिकस्तथा॥
स्वयंभूलीलयासोहंब्रह्मेतिविदितास्सवान्॥७॥ ग्रहस्ताचार्यो तिथीनांचनकर्त्ताकार्यमंज

श्री

पा॰ ते॰
१२

सा॥ निर्नमो निर्ग्रहो भूत्वा बंधुसंगविवर्जितः॥८॥ निष्कारणो निष्कलंको निर्विकल्पश्च निष्क्रि
यः॥ निष्प्रपंचो निरालंबो रागद्वेषादिवर्जितः॥९॥ निषेधे विधिरूपे च एकचित्तो भवेच्च सः॥ कर्म
कांडग्रहस्थानां मंदिरे षु शुभाशुभे॥१०॥ विवाहादिषु कार्येषु शवादिस्थापनादिषु॥ आगत्वा
नैकदिवसं पुरग्रामे वसेच्च सः॥११॥ गृहचर्येषु अन्नपानयाचमानो भवेच्च सः॥ दत्तं चेदपि भुंजीत
नो चेत्क्लेशं न कारयेत्॥१२॥ नांदोलिकां रोहयेत्स अश्वारोहणवर्जितः॥ पादचारी च संभूय चरे
द्भूवलये सदा॥१३॥ अभक्तानां च भक्तानां शिक्षाशापविवर्जितः॥ एकभुक्तो भवेत्सोपि सदावे
राग्यवान्भवेत्॥१४॥ षट्स्थलात्मा निरालंबस्थाने ध्रुवे ध्यवान्भवेत्॥ सतीविद्यासुतस्तोषो
विरागो बांधवः स्मृतः॥१५॥ क्षेमैव परिवारस्तु सरव्वा शांतिरितीरितः॥ भक्तिर्माता सदाचारः पितास
संसु[illegible]लामम॥१६॥ स्नुषा श्रद्धेव संमोक्षो पौत्रो मैत्र्यादिसद्गुणाः॥ ज्ञानमेव शरीरं स्याद्विचारः क्षे

त्रमेवच ॥१७॥ दासीत्वहिंसासंमोक्ता। अस्थारासस्तथैवच ॥ धर्मोवाहनमित्युक्त आचारोदमएव
च ॥१८॥ मुक्तिरेववरोदेश इति निश्चितधीस्सदा॥ कंथाकमंडलुंचैव दंडोवैभैक्षपात्रकं ॥१९॥ भस्मपात्रं
चपंचैतान् बाह्यमुद्राश्चधारयेत्॥ तत्तन्मांत्रानुसारेण धृत्वातु तदनंतरं ॥२०॥ तदन्याः पंचमुद्रास्तु
त्वंतरंगेतुधारयेत्॥ समतेवचकंथास्यात् दंडोज्ञानंतथैवच ॥२१॥ कमंडलुर्दयैवासीद्वैराग्यंभैक्ष
पात्रकं॥ क्षमैवभस्मघुटिकामेवंचांतेपिधारयेत् ॥२२॥ केशग्रंथीजटावांश्चशिरोमुंडीतथैवच॥
मृगाजिनीचसंभूयभूत्वाचैवदिगंबरः॥२३॥ एवंविधान्शैववेषान्ह्यंगीकृत्यसदाचरेत्॥ शिवार्च
नत्रिपुंड्रा णांधारणंभस्मधूलनं ॥२४॥ शिवमंत्रंजपश्चैव ॥ शिवध्यानपरायणः॥ षट्चक्रेपुरुछ
लकुलविचारश्चतथैवच॥२५॥ सदालिंगांगसंयोग क्रियाज्ञानादिसंयुतः॥ रसायनाद्यं कृत्वातुतथा
वैक्रयविक्रयं॥२६॥ वैद्यवश्यज्योतिषंचव्यवहारांश्चलौकिकान् ॥ विषयादीन्मस्त्रिसक्ताविरक्तस्या

पा॰ ते॰
१४

दनंतरं ॥२७॥मबारव्यारण्यमध्ये स्तु लोभपंकं परित्यजेत् ॥तिरस्कृत्वेंद्रियरिपून्मोहवशादि
चित्रितान् ॥२८॥तथैव क्रोधशार्दूलं ममतासर्पभीतिजं ॥मन्मथारव्यरते थिनं च मदारव्यतिमि
रंतथा ॥२९॥तापत्रयारव्यगर्त्तायां नमविष्टोभवेच्च सः ॥विषयारव्यकंटकेनापि पादमेक्षणवर्जि
तः ॥४०॥नम विशेभवेत्सोपि अहंकारे महाह्रदे ॥सर्वाव धानिभूत्वेव वीरक्षानेच निष्टितः ॥
॥३१॥गुपचारैः षोडशाभिश्च पूजित स्तोषवर्जितः ॥अपूजितश्चेन्नेदुःखी भवदेकमकारवान्
॥३२॥सीतोष्णयोः सुखेदुःखे शिलाविग्रहवद्भवेत् ॥क्रियादीक्षादिना पूर्वैराचार्यैर्धृतमंजसा॥
सक्रियासंयुतं चेष्टलिंगब्रह्ममयं तथा ॥गुरुक्रेणसूक्ष्मे तु शरीरेस्वद्वितीयकः ॥३४॥इदं प्राणम
यं लिंगमिति संभावयेत्तथा ॥तथैव प्राणलिंगं तु शरीरे कारणाह्वये ॥३५॥भावलिंगमिति ज्ञात्वा चे
ष्टलिंगत्रिधा कृतं महालिंगमिति ज्ञात्वाति सुमेदं न भावयेत् ॥३६॥ इष्टलिंगं ततो धृत्वा पंचाचार्यैस्त

तःपरं॥ अंतरंगे पितुर्भावं भावइत्वावभावयेत्॥ शिशुभावैःपट्स्थलांसं निरालंबे विलासवान्॥एता

दृशनिराभारवीरशैवस्यकुत्रचित्॥३९॥ कांतारे त्विष्टलिंगस्य वियोगे सति दैवतः॥सामान्य

वीरशैवेवमंत्रोक्तविधिनाततः॥३९॥ नपुनर्धारयेल्लिंगं वीरशैवइवस्वकं॥नप्राणं चपरिसा

ज्यंवीरशैवविशेषवत्॥४०॥इष्टलिंगंमानसेचप्राणलिंगं नभावयेत्॥तैलन स्नाव र्तिकातुज्यो

तिस्पर्शेनज्योतिवत्॥४१॥नपुनःपूर्वभावेनवर्ततेचयथातथापूर्वाचार्यैर्दत्तलिंगंममांगस्प

र्शमात्रतः॥४२॥सोहंभावेनैक्यभूतोमयासार्द्धंनसंशयः॥इतिनिश्चित्यमनसानभेदश्चांगलिं

गयोः॥४३॥तस्माल्लिंगगतंवापि अहमेवेष्टलिंगकः॥इतिनिश्चित्यधीःसोपिचतुष्टात्साश्र

मीषुच॥४४॥अस्युत्कृष्टोभवेत्सज्योनिराभारीनसंशयः॥कृमिकीटपतंगेभ्योप्यधिकाःप

शवःस्मृताः॥४५॥पशोःसकाशान्मनुजोमनुष्याच्चद्विजोधिकः॥द्विजादपिक्रतोःकर्त्तायज्वि

पा॰ तं॰ १५

न्नोयतियोधिकाः॥४६॥यतिभ्योज्ञानिनःश्रेष्ठाःज्ञानिभ्यश्चशिवार्चकाः॥शिवार्चकाल्लिंगसंगीते
भ्यःषट्स्थलवेदिनः॥४७॥तस्मात्श्रेष्ठोनिरालंबज्ञानीसर्वाधिकोमतः॥सुज्ञानकोटिसोप्येव
निराभारीसुपूजितः॥४८॥ ६७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
इतिशैवमभेदंचवीरशैवस्यमुख्यतः॥उपदिश्यद्विराट्रूपीभगवान्परमेश्वरः॥१॥पंचाचार्यमुख्या
नांस्वमुखोद्भूतरूपिणां॥इत्युपादिश्यभगवानागमानांप्रभेदनं॥२॥वक्तुंप्रचक्रमेतेषांभगवान्
परमेश्वरः॥अष्टाविंशतिसंख्याकाः आगमास्मन्मुखोद्भवाः॥३॥तेषांमध्येचाष्टदशसंख्याकाः
सात्विकाःस्मृताः॥तथैवदशसंख्याकास्तामसादैसमोहिकाः॥४॥येत्वष्टदशसंख्याकाआ
गमाःश्रुतिसंमताः॥प्रणवेनैवपंचानांदिक्प्रधानविनिर्णयः॥५॥व्यवहारिकभेदस्तुसंसारे
चैवनिश्चितः॥मुक्तौत्वभेदएवेतिप्रतिपादनतत्पराः॥६॥आम्नायार्थसमाख्याताविमलंभ

विवर्जिताः॥शिवःसर्वोत्तमइतिप्रतिपादनतत्पराः॥७॥तस्मादस्युत्तमाज्ञाताअष्टादशसदाग
माः॥तदन्येयेदशविधाआम्नायार्थविरोधिनः॥८॥सविमलंभकाःसर्वेजातिसांक्यवादिनः॥
चतुराचार्यमुख्यानांदिक्प्रधानंविशेष्यते॥९॥इत्यासुरविमोहायप्रतिपादनतत्पराः॥इ
तिभैरवमुख्यानांमुत्कर्षप्रतिपादकाः॥१०॥तस्माद्दशविधाएतेतामसाःपरिकीर्तिताः॥ते
षांनामानिसर्वाणिवक्ष्यन्तेपुरतोमया॥११॥कामिकोयोगजश्चैवचिंततःकिरणागमः॥अजि
तश्चतथासूक्ष्मःसहस्रश्चांशुमानिति॥१२॥सुप्रभेदस्तुविजयोविश्वासश्चस्वयंभुवः॥पारमेशः
कारणश्चवीरोभीमस्तथैवच॥१३॥मुकुटोवातुलश्चेतिअष्टादशसदागमाः॥गारुडोदक्षि
णश्चैववामोभुततथैवच॥१४॥बौजीनोतरेवश्चपाशश्चैवतथापशुः॥असुरागमइत्येतेदश
संख्याउपागमाः॥१५॥एतेषांनांतरोभेदःषण्णावत्यधिकाशतं॥अष्टाविंशत्यागमेषुनिर्दि

शृष्टादशागमान्॥१६॥पंचाचार्यानुपादिश्यपुनस्तान्म्त्यभाषत॥एकबीजसमुत्पन्नवृक्षस्यांकु
रपल्लवाः॥१७॥शाखापुष्पंफलादीनि व्यावहारिकभेदतः॥दृश्यंतेचयथाभिन्नास्तथापंचाचार्यसं
ज्ञिकाः॥१८॥नामगोत्रैस्तथासूत्रैस्तथादंडकमंडलैः॥भिन्नाअपिपंचैतेमुक्तावायेकोभवंति
हि॥१९॥इतितान्बोधयित्वातुभवंतःसर्वएवहि॥स्वस्वगोत्रानुसारेणकंथादंडकमंडलू
न्॥२०॥गोत्रप्रवरवर्णश्चवेदादिकनिर्णयंतथा॥स्वेषांस्वेषांस्वस्वगोत्रमनुस्तत्त्वोपदिष्टकैः॥
भिन्नभिन्नैःपंचरूपैर्भिन्नवर्णैरनुत्तमैः॥स्वस्वकलशस्थापनादिविधौरचितंतद्विधिं॥२२॥
बोधइत्वातुपंचानामाचार्याणांसदाशिवः॥यैर्यैर्मंत्रैर्दीक्षितायेनेगुरोर्गोत्रसंमताः॥२३॥यो
ग्यास्तेगुरुगोत्राणांइतियुयुंस्वस्वशिष्यकान्॥स्वस्वगोत्रानुसारेणदीक्षांकुरुतेतत्त्वतः॥२४॥
इतितान्बोधयित्वातुवीरशैवमहेश्वरः॥ ॥पार्वत्युवाच॥ ॥भगवन्श्रोतुमिच्छामिसर्वेषां

शीघ्रमुक्तिदं ॥ वेदोक्तमार्गमथवापाशुपत्यामथापिवा ॥ २५ ॥ कुत्रवेदाःसमुद्भूताः आगमाःकु
त्रसंभवाः ॥ वेदोक्तेनकथंमुक्तिरागमैस्तुकथंवद ॥ २६ ॥ किमर्थंवेदमुत्सृज्यंआगमेषुप्रवर्त्तते ॥
तत्सर्वंवदविस्तार्यश्रोतुमिच्छामिसांमतं ॥ २७ ॥ ॥ ईश्वरउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिशी
घ्रंमुक्तिप्रदायकं भगवन्नासिकाश्वासात्सर्ववेदाःसमुत्थिता ॥ २८ ॥ अष्टाविंशत्यागमास्तेव
दनादेवनिर्गताः ॥ वेदोक्तमार्गतोमुक्तिस्तारतम्यानुसारतः ॥ २९ ॥ तस्माद्वदनसंभूत्वा आगमाः
शीघ्रमुक्तिदा ॥ कर्मकांडीयुतानांतुशतजन्मनिमुंक्तिदाः ॥ ३० ॥ पंचजन्मनिमुक्तिस्यान्मुमुक्षू
णांतथैवच ॥ अभ्यासिनां त्रिजन्मांते तथैवेवानुभाविनां ॥ ३१ ॥ द्विजन्मनितथामुक्तिरारूढस्वे
कजन्मनि ॥ इत्युक्तेवेदमार्गेणतद्विहायपरमेश्वरः ॥ ३२ ॥ कामिकादीन्वातुलांतान्स्वमु
खादेवसंभवान् ॥ उपागमान्दशाविधान्देसमोहनकारिणः ॥ ३३ ॥ परित्यज्यात्वत्तपसा

पा॰तं॰
३७

महाफलसुदायकान्॥सदागमान्वीरशैवप्रतिपादनतत्परान्॥३४॥पादिशत्परंज्योतिः
पंचमाचार्यसंज्ञिकान्॥३५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
५ ॥पार्वत्युवाच॥ ॥ब्रह्माऽस्रजनात्पूर्वंब्रह्माविष्णुमहेश्वरान्॥प्रमथादीन्मनुष्यांस्ता
न्सुरासुरगणानपि॥१॥सम्यक्सर्वंजगत्सृष्ट्वाममपंचमुखोद्भवैः॥आचार्यैर्दीक्षितान्कृ
त्वाबंधइत्वेष्टलिंगकान्॥२॥युगभेदेनलिंगानांवर्णभेदेनतत्परं॥आचार्यनामभेदेन
कृतवान् लिंगधारणं॥३॥तत्रसंसारिणः केचिन्नित्यमुक्ताश्चकेचन॥ब्रह्माविष्णुम
हेशानांनित्यसंसारिणश्चते॥४॥नंदिभृंग्यादयः सर्वे नित्यमुक्ताश्चविश्रुताः॥इत्यु
क्तंभवतापूर्वंतत्सभेत्स्वमेवहर॥५॥ ॥ईश्वरउवाच॥ ॥विष्णोःसकाशाद्ब्रह्मांत य
स्माज्जातोमहेश्वरः॥पुनर्विष्णुर्महेशात्तुतस्माच्चचतुराननः॥६॥चतुर्मुखाच्च

संजातो विष्णुस्तस्मान्महेश्वरः॥ गुणैर्विष्णुरीश्वरः॥ एवं पुनः पुनः सृष्टा तस्मात्संसारिणश्च ते॥७॥
नंदी भृंगी तथा वीरो वृषभः स्कंद एव च॥ एकदेवमयासृष्टा तस्मान्मुक्ता भवंति ते॥८॥ मत्ज्ञान
मेव नंदी स्यात् भृंगी वैराग्यमेव च॥ मत्तापो वीरभद्र स्यात् सद्धर्मो वृषभस्मृतः॥९॥ कीर्ति
स्कंद इति मे ज्ञाः पंचैते मत्स्वरूपिनः॥ तस्मादक्षरनामानः क्षराः संसारिणः स्मृताः॥१०॥
उभयेषामुत्तमोहं तस्मात्सर्वोत्तमो मतः॥ अहं च जनितार्थाय ब्रह्मा विष्णुमहेश्वरान्॥११॥
इंद्रादीन् यममुख्याश्च मदंगेभ्य समुद्भवान्॥ मद्रोमकूपादुत्पन्नाः सप्तसप्ततिकोटयः॥
॥१२॥ प्रमथाश्च समुत्पन्ना मदंशा मत्स्वरूपिणः॥ एतानन्यान्मानवान्तान्मदंगेभ्यः समु
त्थितान्॥१३॥ सत्समात्तन् शैलकन्यां लक्ष्मीं चापि सरस्वतीं॥ एवं सृष्टा जगत्सर्वं चेतना
चेतनात्मकं॥१४॥ तेषामुद्धरणार्थाय वीरशैवानपि सृजेत्॥ स्वाननैर्म वसिंधोश्च नावि

काइव तारणात्॥१५॥जननाख्यलताया्श्च लविचाइतररूपिणः॥पीड्यतेशुकशमनेच्छेदने
चकुठारकान्॥१६॥विशालनेत्रयज्ञोपवीतलिंगांकितांगणः॥त्रिपुंड्रधारिणःपंचवर्णगा
यत्रीजापकान्॥१७॥शिवोक्तवैदिकाचारपाशुपत्यादिनिष्ठितान्॥अद्वैतमत्तदुग्धा
ब्धेःकुंभसंभवरेतयिनः॥१८॥पाषंडादिमतारण्यदहनेध्यनलाइतान्॥मायावादिहमा
णांचलविनाइतरूपिणः॥१९॥बौद्धादिभेदनेचैववज्रायुधसमप्रभान्॥द्वैतमतपंकेरु
हगजश्रेष्ठइवाइतान्॥२०॥जैनमातंगसिंहाश्चचार्वाकांबुदमारुतान्॥वीरशैवमतां
बोधिवर्द्धनेसोमसंमोतान्॥२१॥हरिद्धरितसत्कीर्तिसत्कांतांश्च सतांमतान्॥अस्याश्र
माख्यांश्चैकद्वित्र्यक्षरांश्च ततःपरं॥२२॥चतुःपंचाक्षराख्यांश्च भिन्ननामभिरेवच॥स्व
ष्वातेषांकामिकादिवातुलांतागमादिषु॥२४॥अष्टाविंशतिभेदेषु।क्रियापादस्तथेव

च॥चर्यापादोयोगपादोज्ञानपादोतथैवच॥२४॥चतुर्थाःसंस्थिताः पादास्तेतेषुकुंडनीत
था॥पतिर्नीयापशुःपाशोदीक्षाचेतिततःपरं॥२५॥निर्णयंषट्पदार्थानांबोधइत्वाततःप
रं॥पशुपतिःपक्षपातीयत्रतिष्ठतिभामिनी॥२६॥सत्ताम्भूक्रियापादश्चर्याश्चर्यापादंब्र
वीमिते॥शिवतत्वाभिव्यक्तिंचनित्यकर्माधिकारतां॥२७॥प्रतिपादयतियत्रासोचर्यापा
दइतीरितः॥अथेयंतस्यस्वरूपंतद्योगपादंविदोविदुः॥२८॥ईश्वरस्यक्रियाशक्तिरू
पदीक्षासमन्वितः॥धारयेल्लिंगमतुलमितियत्रसविस्तरः॥२९॥इत्युपादिश्यचपुन
स्त्रयान्संबोध्यतत्वतः॥एवमेवमुपादिश्यब्रह्माविष्णुमहेश्वरान्॥३१॥ततस्तेमतविरद्दे
षंविहायचसुरेश्वराः॥मोक्षाभिलाषिणःसर्वेप्रमथाताःसुरेश्वराः॥३२॥अगमोक्तप्रका
रेणपरंज्योतिस्वरूपिणां॥स्वमुखेवाद्भूतपंचानांमतसंस्थापनायच॥३३॥निर्मितैर्यु

पा॰ तं॰
१९

गभेदेनचैकद्वित्र्यक्षराह्वयैः॥ चतुःपंचाक्षराह्वैश्च कृते नीलमयं तथा॥ ३४॥ इष्टलिंगं च चतेध्रु
त्वामोक्षमार्गमपिपठन्॥ एकाक्षरस्तु त्रेतायामेकवक्त्रो गणेश्वरः॥ ३५॥ द्व्यक्षरो द्विमुखश्चा
सीत् त्र्यक्षरस्त्रिमुखश्च सः॥ चतुरक्षरश्चतुर्वक्त्रस्तथा पंचाक्षरश्च सः॥ ३६॥ पंचवक्त्रेति सं
भूता स्त्रेतायां ते गणेश्वरः॥ तैरेव कौसिकश्चैव काश्यपश्च तथैव च॥ ३७॥ गौतमश्च वसि
ष्ठश्च विश्वामित्रस्तथैव च॥ गार्गेयप्रमुखाश्चैव बहूना मार्यादिकोस्य ॥ ३८॥ इति श्रुत्वा मुनि
गणाः पंचवक्त्रैस्त्रिभिरेव च॥ आगमोक्तविधानेन रत्नलिंगमधीधरन्॥ ३९॥ द्वापरे चै
कवक्त्रोपि दारुकः परिकीर्तितः॥ द्विवक्त्रः शंकुकर्णोभूत् त्रिवक्त्रो रेणुकश्च सः॥ ४०॥ चतु
र्मुखो धेनुकर्णः पंचास्यो विश्वकर्णकः॥ एतैः पंचभिराचार्यैर्द्वापारे क्षत्रियो मताः॥ ४१॥ हरि
श्चंद्रो नलश्चैव पुरकुत्सपुरूरवाः॥ सगरः कार्तवीर्यश्च अंबरीषस्तथैव च॥ ४२॥ शशीबिंदु

इति ष्टुमरुत्वसुराजपि तथैव राक्षसाः सर्वे रावणप्रमुखा अपि ४३ द्वा॰ तेत्रेतायुगे चैव सुराश्च
मुनयस्तथा नीलरत्नमयं लिंगं धृतवंत इति स्मृताः ४४ तथा राजन्यकाः सर्वैः पंचवर्णस्फटिकं नमिरेव च ॥
अविधरं नयत्नमयं लिंगं शास्त्रोक्तमार्गतः ४५ कलौयुगे दारुकोसोमरलाराध्यनामवान् शंकुकर्ण
राध्य एवैक एको रामेति विश्रुतः ४६ रेणुकाचार्य एवासौ रेवणाराध्यनामवान् धेनुकर्णाचार्य एव पंडि
ताराध्यनामवान् ४७ विश्वकर्णाचार्य एव विश्वाराध्य इति स्मृतः कलियुगे मनुष्याणां ब्रह्मक्षत्रि
याणपि ४८ शूद्रादिनामवृद्दशजातिनां च तथैव च तथा शैतैककुलजे मनुष्याणां तथैव च ४९
एते जगद्धितार्थाय संचारं चक्रुरंजसा अतएव मनुष्याश्च ब्रह्मक्षत्रविशस्तथा ५० षट्चक्रेव
तिभिश्चैव तथा राजकुलोद्भवे सर्वे नीलमयं लिंगं रत्नमयं तथा ५१ तथा वज्रमयं लिंगं धृतवेति
च विश्रुतः तथैकजन्मनामुक्तिर्विराणां च महेश्वरी ५२ इतरेषां तु शैवानां मुक्तिर्जन्मत्रये भवेत्

२० लिंगधारणमात्रेण शिवत्वं प्राप्यते नरै ५२ शैवमतं देवि सद्यो मुक्तिर्न संशयः न कैलाससमो लो
कोन देवशंकरात्परः ५४ न शैवाच्च मतं मुक्तेः परमं पदं इति निश्चित्य मनसा चागमोक्तविधानं
तः ५५ पंचसींहासनारूढो मरुत्वाराध्यमुख्यकैः दीक्षां प्राप्य सिलालिंगमिष्टलिंगादि निधार
येत् ५६ पार्वत्योवाच भगवत्सगुरुपूजायां महात्म्यं कथितं त्वया भूयोपि श्रोतुमिच्छामि गुरु
महात्ममंजसा ५७ गुरुपदेशो वल्लवानूनतास्मिन्नलसंस्थिता इत्युक्तं भवता पूर्वं तन्महा
त्म्यं च मे वद ५८ गुरवोत्तमवे संति शिष्याश्च बहवो भुवि तेषाम मध्यवरः कोसौ वद प्रभो ५८
उपदेशस्त केषां वै कर्तव्यां गुरुसत्तमै पश्चाद्गुरुपदे प्राप्ति केषां भवति मे वद ६० ईश्वरो वा २०
च गिरिजे संप्रवक्ष्यामि सावधानमनाः शृणु सर्वेषां जगतां नाथोप्यवमेवन चापरं ६
नंदीभृंगीतथा वीरो वृषभस्कंद एव च मत्स्वरूपास्समुत्पन्ना पंचगोत्राधिकारिणः ६

दारुकः शंकुकर्णश्च रेणुको धेनुकर्णकः विश्वकर्णैश्च पंचैते पंचगोत्रसमुद्भवाः ७ एतेषां
प्रतिनामानि मयोक्तानि न संशयः मरुलश्चैकरामश्च रेवनपंडितस्तथा ८ विश्वाराध्य इति प्रो
क्ताश्चैते अराध्यकाः पुरा ममपंचमुखानि ति सज्ञानी हि वरानने ९ सद्योजातश्च प्रथमो वाम
देवो द्वितीयकः अघोरश्च तृतीयस्तु तत्पुरुषश्च चतुर्थकः १० ईशानपंचमश्चेति मुखानि म
म सर्वशः तान्याननानि पंचैवे चैवेदोक्तानि न संशयः ११ विरशैवमतोधारहेतवः पंचमानघे
मम मुखेभ्यः समुत्पाद्य तैरेवा कर्षमंजसा १२ तेषां नामानि गोत्राणि सूत्राणि सूत्रदंडकमंडलु
मंत्रबीजं च प्रवरं यथा वर्णं तथाशकं १३ प्रत्येकं च प्रवक्ष्यामि प्रतिनामानि चेश्रुणु सद्योजात
मुखो सन्नो दारुकः परिकीर्तितः १४ तन्नाम मरुलाराध्य तस्य पुत्रश्च वृष्टिकं प्रवरो वीरशैवे
ति अतिवर्णश्च वर्णकः १५ तस्य दंडस्तु पालाशस्तस्य तांम्रकमंडलु नकारो मंत्रबीजश्च शं

२१ कोदारकईरितः १६ कलशतश्चताम्रश्च सद्योजातमुखंतथा तस्य कथाच मांजिष्टालक्षणं तं
दिगोत्रिकं १७ वामदेवो मुखोमन्त्रो शंकुकर्णेतिनामतः एकोरामेति त्वन्नाम तस्य सूत्रं च कं
बकं १८ प्रवरोवीरशैवेति अतिवर्णाश्च वर्णकः वेणुदंडस्तस्य दंडं तस्य कांशकमंडलुः १९
मकारोमंत्रबीजं शं शंकुकर्णशंकः वेणुदंडकलशं तस्य कांश्यं च वामदेवमुखंतथा २० हरिद्
र्णीतस्य कंथालक्षणं भृंगीगोत्रिणां अघोरस्य मुखोमन्त्रोरेणुकः परिकीर्तितः २१ तन्नामरेव
णाराध्य सूत्रं षड्वडित्यपि वीरशैवेतिप्रवर अतिवर्णाश्च वर्णकः २२ कमंडलुचरजतं अ
श्वत्थोदंडइरितः शिकारोमंत्रबीजं च रेणुकोशंकइरितः २३ शिकारोमंत्रबीजं च कलशं त २१
स्य रजतं अघोरोमंत्रइरितः तस्यश्वेतमरकंतथा लक्षणं वीरगोत्रिणां २४ तस्य [illegible]पारस्य
मुखो मन्त्रो धेनुकर्णइतिरितः तन्नाम पंडिताराध्यस्तत्सूत्रं मोक्तिगुच्छकं २५ प्रवरो

वीरशैवेति अतिवर्णाश्च वर्णकः न्यग्रोधस्तस्य दंडो भूल्लोहस्तस्य कमंडलु २६ वकारो मंत्रबीजश्च शं
कोग्रो कर्णऋरितः कलशस्तस्य कपोतस्य सुरूपोमुखईरितः २७ तस्य कंथा च काचो लक्षणं वृषभगो
त्रिणां ईशानास्य मुखोत्पन्नो विश्वकर्णेति विस्तृतः २८ विश्वाराध्यश्च तन्नामतस्सूत्रं पंचवर्णकां ॥
वीरशैवेति प्रवरोस्यति वर्णाश्च वर्णकः २९ दंडबील्वइतिप्रोक्तः सौवर्णं च कमंडलुः यकारो मंत्रबी
जश्च विश्वकर्णीशकस्मृतः ३० कलशस्तस्य सौवर्णमीशानो मुखईरितः तस्य कंथा पीतवर्णा ल
क्षणां स्कंदगोत्रिणां ३१ एतेषां पंचगोत्राणि भिन्नाभिन्नन संशयः एकैकस्य च गोत्रस्य शाखास्
त्रादिकं पृथक् ३२ यत्र गोत्रस्य या शाखा यत्सूत्रं यकमंडलु या कंथा यश्च दंडश्च गुरुस्तैश्च
समन्वितः ३३ एवमहि पंचानां गोत्राणां गुरुरीरितः स एव पीठाधिकारी आराध्यश्च त एव हि
३४ आचार्य स एवासस्सिंहासनपतिश्च सः एतानि पंचनामानि पंचानां सूत्राणां पृथक् ३५ महासत्रे

पा॰स्तु॰

२२

स्यचैकस्यउपसत्त्राणिद्वादश तेषामप्युपसत्त्राणांपंचनामानिसंतिहि ३६ सिंहासनपतित्वंचनास्ति
तेषांकदाचन पार्वत्युवाच एकश्चवीरशैवश्च चतुर्विधमभूत्कथं ३७ चतुर्विधानांभेदस्तुतेस्तेका
यंचमेवद ईश्वरोवाच सामान्यवीरशैवाश्चवीरशैवाश्च विश्रुताः ३८ निराभारीवीरशैवाःशुद्धविरा
श्चतुर्विधाः चतुर्विधानामेतेषामधिकारंप्रशाध्यते ३९ पार्वत्युवाच सामान्यवीरशैवानांदीक्षालिंग
स्यबंधने शीक्षणेरक्षणेचैवकतोकश्चवदप्रभो ४० ईश्वरोवाच सामान्यवीरशैवानांदीक्षालिंगस्य
धारणे वीरशैवाश्चगुरवेःशीक्षणेरक्षणेतथा ४१ आचारप्रायश्चितादेशुभाशुभविधौतथा पंच
पीठादिपतयःपंचसंस्थानमाश्रिताः ४२ शुद्धवीराश्चातियथोनिराभासस्तथैवच सामान्यवीर २२
शैवानांशीक्षणेरक्षणेतथा ४३ आचारप्रायश्चीतादेशुभाशुभविधौतथा कर्त्तारोनभवंत्येते
पंचमुद्रान्विताअपि ४४ बलादपीचकुर्वीतसाचांडालोभविष्यति पार्वत्युवाच शुद्धवीरशैवा

चार्यैः पंचमुद्रान्वितस्तथा ४५ किं कार्यं तन्मम ब्रूहि विस्तराच्च महेश्वराः ईश्वरोवाच सुद्धवीरशिवा
चार्याः पंचमुद्रान्विता भुवीः ४६ संचारं स्वेच्छया कुर्युर्भक्तैर्वंद्याश्च सर्वशः देवादागच्छतां पुंसां मुपदेश
रतो भवेत् ४७ ज्ञानोपदेशः कर्तव्यं न च क्रियोपदेशकृत् अभक्तस्य तु कर्तव्यं शापानुग्रहकर्मकृत् ४८
निराभारा वीरशैवा ------ दंडखंडं न कर्तव्यं तेषां नास्ति कदाचनः ४९ सामान्यवीरशैवानां मु
पदेष्टा च यो गुरुः गुरुगोत्रं च तत्गोत्रं ज्ञेयं सर्वप्रकारतः ५० स्वगोत्रैः सह संबंधो न कार्यस्तैः कदाच
न प्रमादाद्यदा प्रकुर्वीत संबंधस्तु स दोषभाक् ५१ पार्वत्युवाच चेतुर्णां वीरशैवानां प्रभेदः परिकीर्ति
तः तैस्तैः कार्यं त्वया प्रोक्तं तेषां गोत्रादिकं पृथक् ५२ महासत्राश्च ये प्रोक्ता उपसत्राश्च द्वादशः ते
षां तेषां पृथक् संति सत्राणां महतामपि ५३ इत्युक्तं भवता पूर्वं तत्प्रभेदं च मे वद ईश्वरोवाच दधि
लंबः पंडवडिमुक्तगुच्छश्च तु थैव च ५४ पंचवर्णेश्च पंचैते महासत्राः प्रकीर्तितः दारुकस्य चर

॥सु॰
२२ छि स्यात् ब्रह्मकर्णस्य लंबकां ५५ पडवडिरेणुकस्य स्यात्त याचे मुक्तगुच्छकं धेनुकर्णस्य सूत्रस्यात्
पंचवर्णं च सूत्रकं ५६ विश्वकर्णश्च पंचैते महासूत्राधिकारिणः दारुकस्य विलासेन वह्निसिद्धाद
तश्च सः ५७ शंकुकर्णविलासेन लंबका द्वादशा अपि रेणुकस्य विलासेन पडवडि द्वादशास्म
ताः ५८ गोकर्णस्य विलासेन मुक्तगुच्छाश्च द्वादशः विश्वकर्णविलासेन पंचवर्णाश्च द्वादशः ५९
महता पंचसूत्राणां योदंडेयत्कमंडलुं तानेव चोपसूत्राणां भस्मदंडकमंडलु ६० गोत्रं चैव तथा
कार्यः कलशो वर्णकस्तथा महासूत्राधिकारास्ते उपसूत्राणां न संशयः ६१ पार्वत्योवाच॥ एते
पंचमहाचार्यैः स्वपंदस्य कृतो यदि एषां केषां प्रकर्तव्यं तेषि विस्तार्य वद हि मे ६२ ईश्वर उवाच॥
उपदेशस्तु गोत्राणां कर्तव्यो गुरुसत्तमः उपसूत्रस्य कर्तव्यं महासूत्रावलंबिनः ६३ लोकरूप्यं २२
तु सु विस्तार्य पाशुपत्यागमोदिते प्राक्तनाः पंचमाचार्य कोदिमूविलयामूविसचरन ६४ येत्रसं

स्थितमाकार्यं सएवमठउच्यते सींहासनतदेवासर्पंचानांगोत्रिणांपृथक् ६५ तत्रकश्चित्
देभक्त्यास्वगुरुंप्रणिपत्य च उपदेशंचदीक्षांचकुरुमेगुरुसत्तमः ६६ इतिसंप्रार्थितस्तुगुरुःका
रयेदुपदेशनं देवालयमठवापिदेशिकस्यगृहेपिवा ६७ मंडपंकारयित्वातु चतुरस्रंसुभूषि
तं षोडशस्तंभसंयुक्तः मथवाद्वादशैरपि ६८ दर्भमालासमायुक्तंदिक्ध्वजैरुपशोभितं घंटा
तोरणसंयुक्तंपुष्पमालाविभूषितं ६९ चूतपल्लवसंयुक्तंगंधपुष्पाक्षतैर्युतं पताकाध्वज
संयुक्तंशंखदुंदुभिघोषितं ७० वेदघोषसमायुक्तंमठयत्कारयेद्बुधाः तत्रवेदींकारयित्वा
चतुरस्रंसुशोभितं ७१ पद्माकृतिवाथवेदिंवर्तुलाकारमेववा दर्पणोदरसंकाशंनिम्नोन्नत
विवर्जितं ७२ अपसर्पंतुयेभूताएभूताभूमिसंस्थिता एभूताविघ्नकर्तारस्तेनश्यंतु
शिवाज्ञया ७३ इतिमंत्रेणशुद्धिंपंचगव्येश्चमार्जयेत् तत्रंरंगसमाख्यायपद्मपत्र

२९ लेंन्यसेत् ७४ सुस्नात्वा च म्न विधिना पुण्याहं वाचयेत्ततः रुद्रसूक्तेन चांगानि शिरः
फलं च कर्णकं ७५ जिव्हायां च भुजद्वंद्वे कुक्षौ नाभौ च पृष्ठके ककुदे का?हस्थस्थाने विभे
त्याचिन्हितो गुरुः ७६ रुद्राक्षधारणं कृत्वा कलशस्थापनं बुधः आछिद्रान्वन्हिसंत
प्तान्पाषाणस्फोटवर्जितान् ७७ खर्पराकाररहितान्लघुस्थूलविवर्जितान् शरक
स्य च ताम्रं च शंकुकर्णं च कांशकं ७८ रेणुकस्य च रौप्यं च कपोतं धेनुकर्णकं सुवर्ण
बिम्बकर्णस्य कलशं स्थापयेद्बुधः ७९ अथवा मृन्मयं कुर्यात् तच्चूर्णैश्च संयुतान् पं २९
चमाचार्यमध्ये तु यः पिठमधिरोहति ८० तदासौ गुरुशब्देन वाचकस्त्वभिधीयते शेषा
श्चत्वार आचार्याः जपदेशश्च साक्षिणः ८१ गुरुस्तस्यां वेदिकायां तंडुलाः स्थापयेत्ततः

तस्योपरिस्थकलशं मध्यमेस्थापयततः ८२ तछेषां कलशांश्चैव स्थापयच्चयथाक्रमं ॥
ईश्वरस्यमुखान्यव कलशाभिन्नशेषयः ८३ एतादृशानां कलशानां नवसूत्रंच वेष्टयेत्
प्रत्येकं नववस्त्रेण वेष्टयेद्देशिकोत्तमः ८४ गंगानि सर्वतीर्थानि मंत्रस्तापरिपूरयेत् ॥
संपूर्णपंचकलशा इमंमेति मंत्रेणः ८५ इमंमे गंगे यमुने सरस्वती शतुद्रिवान् तेषुती
र्थांबु परिपूर्णेषु सन्निधापात्रपल्लवान् ८६ दूर्वांकुरांसंयुगांश्च नागवल्लीदलान्विता
न् तेषु संस्थाप्य रत्नानि संक्षिप्य परिपूजयेत् नानाविधैः कुसुमैश्च गंधपुष्पाक्षतादि
भिः ८७ एवं शास्त्रोक्तविधिना पचमान् कलशानपि संपूज्य फलनैवेद्यं सतांबूलं सद
क्षिणां ८८ दशधा तत्र निक्षिप्य रहोणैः परिजयेत् पार्वत्युवाच पंचैव कलशस्तत्र निक्षि

स्यापरिपूजिता ८८ किमर्थंदत्ताधातेषां मर्हणादीनि निक्षिपेत् ईश्वरो वाच महदाचार्यः पं
चविधा कृताचार्यश्च पंचधाः ८० एवं दशविधानातु भागश्च परिकल्पिताः तस्मादेशकेवि
धात्रे च फलनैवेद्य अर्पयेत् ८१ एवं दशांपंच पूर्णानि क्षिपेत् पंचधा क्षिपेत् पूर्णभागं महदा
चार्यश्चाहरेत्सु यथाक्रमं ८२ उपसूत्रैः समायुक्ताश्चैवमेवत्रिनर्णयः तदर्धं चैव गृह्णी
यात् कृत्स्नाचार्यः ततः परं ८३ एकस्य भागमेकस्य गृहीतुं नैव नार्हति बलादपि च गृ
ह्णीयात् समानस्कंदता भवेत् ८४ तेन दोषफलं भूतं चानरकानेपविंदति कृत्स्नाचार्यप २५
दार्थं तु महदाचार्यपदाहरेत् ८५ तदातेषां च महत्तां त्सुनत्ता भवति ध्रुव एवं शास्त्रो
क्तविधिना पंचमांकलशानपि ८६ प्राणप्रतिष्ठां कुर्वीत ब्रह्ममंत्रैन्यसेद्बुधः ॥

पूर्णकुंभप्रतिगृह्य करद्वयवासमन्वितः ८७ उमांगादि सर्वांग स्नानं तु शिवशासनात् विधा
य मंगलं स्नानं धौतवस्त्रपरिच्छदः ८८ गृहीत्वा फलपुष्पादि विभूत्यादिसमन्वितान् गुरुस
न्निधिमासाद्य भक्त्या चित्तानुसारतः ८९ तद्देहेण गृहीत्वाथ निधाय गुरुसन्निधौ साष्टांगनम
नं कृत्वा सर्वेषां ऋत्विजामपि ९० गुरुं संप्रार्थयेच्छिष्यस्त्वयं पापमयोयतः तस्मादुद्धारपू
र्वोस्मात्पापदेवमयाकृतात् १ गुरुः कृपांबुधे प्रांते मम लिंगप्रतिष्ठितं मुक्तिदं धारयच्चैवमभ्या
ख्यिं च समुद्धर २ इति संप्रार्थितगुरुरुपदेशं समारभेत् शिष्यदत्तफलाद्यैश्च कलशांशं स्वप्र
पूजयेत् ३ ततश्चत्वारि कलशान् पूजयेच्च यथाक्रमं पार्वत्युवाच पूर्वोक्तानां पंचमानां
कलशाः प्रणवान्विताः ४ ईश्वरोवाच भिन्नाभिन्नाश्च संत्येते चैकदा घाश्च तथापरे तेषां संस्था
पनविधिं वक्तुमर्हसि सांप्रतं ५ उपदेशविधिं वक्ष्ये पाशुपतस्यागमोदितं तत्र पंचविधाः संति
१४

प्रणावाः कलशाइमे ६ मुख्यानि वेदाः पंचानां आर्याणां पृथक्पृथक् तेषां संस्थापन
 विधिं वक्ष्ये शास्त्रानुनिश्चितं ७ चरंति पंच प्राणं वा गुरुराचार्यकास्तथा वेदाः पाशुपतः
श्चैव उपदेशानुसारतः ८ तेषां पंचविधानां तु द्विगुप्रधानं न विद्यते ग्रंथांतरे पि विद्यंते नक्र
यं मोहकं भवेत् ९ मयोदितं प्रधानं स्याद्भूहुवेदेषु संमतं नदेवादरणि वंशा सर्वैरपि नचा
न्यथा १० मोहकं तु प्रधानं च जातिसाकर्यता भवेत् तस्मात्तदुक्तविधिनारिकप्रधानं न का
रयेत् ११ ज्ञानिनां मोक्षणार्थाय शैवानां तारणाय च एतन्मयोदितं गुह्यं न वाच्यं यस्य क
स्यचित् १२ दारुकस्य स्वगोत्राणां मुपदेशो यथा भवेत् तद्दितस्रणवंमध्येनकारं स्थापय 
त्सुधः १३ मकारः पूर्वतः कृत्वा शिकारं दक्षिणं न्यसेत् वकारं पश्चिमे विद्याद्यकारं चोत्तरे
न्यसेत् १४ शंकुकर्णस्वगोत्राणां मुपदेशकृता भवेत् तदा मकारमध्ये तु प्रणवं स्थापय

बुधः १५ शंकारं पूर्वदेशे तु वकारं दक्षिणे न्यसेत् एकारं पश्चिमे विद्यान्नकारं चोत्तरे न्यसेत् १६
रेणुकस्योपदेशे तु शिकारं मध्यमे न्यसेत् वकारं पूर्वतः कृत्वा एकारं दक्षिणे न्यसेत् १७ नकारं प
श्चिमे कृत्वा मकारं चोत्तरे न्यसेत् गोकर्णस्योपदेशे तु वकारं मध्यतो न्यसेत् १८ यकारं पूर्वतः
कृत्वा नकारं दक्षिणे न्यसेत् मकारं पश्चिमे न्यस्य शिकारं चोत्तरे न्यसेत् १९ विश्वकर्णस्योपदे
शे यकारं मध्यमे न्यसेत् नकारं पूर्वतः कृत्वा मकारं दक्षिणे न्यसेत् २० शिकारं पश्चिमे कृत्वा
वकारंश्चोत्तरे न्यसेत् दारुकस्य नकारो यं शंकुकर्णो मकारकः २१ रेणुकस्य शिकारो यं गो
कर्णस्य वकारकः यकारविश्वकस्य प्रणवः परिकीर्तितः २२ यस्याचार्यस्य प्रणवो यस्या
दिशि च वर्तते सादिकृतस्य च विज्ञेया दिकृप्रधानं न विद्यते २३ यस्मिन्न देशे प्रणवः
सादिकृतस्य विनिर्दिशेत् दिक्प्राधान्यं न चैतेषां प्रणवे चैव वर्णनीयः २४ शिष्यलिंगगु

२७ कृणां च कलशानां तथैव च एकसूत्रव्यवस्थापयित्वा शिष्यस्याभिमुखो गुरुः १२५ मुद्रिं कृत्वा पं
चगव्यैर्लिंगं शिष्यकटितथा वर्तुलं च तयोः मुद्रितपामस्तकमस्तकं २६ एकमेकां विधि
स्यायतयोगोलकयोरपि मस्तके सप्रथा पूजां कृत्वा रस्ततथार्चयः २७ लिंगतथार्चयः
छिमान् एकविंशतिपूजनं शास्त्रोक्तं च विना कृत्वा चतुर्भिः तेश्च संमतः २८ पंचाक्षरेमंत्र
वेरमुपविष्य सशिष्यकं तल्लिंगं चगलेवध्वा गुरुतीर्थप्रदायच २९ नसूत्रं दर्भसंयुतं
कंकणं बंधने करोत् दंडं कमंडलुं चैव दत्वाभिक्षां समाचरेत् ३० ततोविसर्जयच्छिमा
नूसदाभिक्षाटनादिषु उपदेशस्त्वयमेव कर्तव्यो सद्गुरोः समैः ३१ उपदेशश्च सर्वेपि २७
भिक्षुकाः परिकीर्तितः देहसुध्यर्थमेतेषामुपदेशः कृतोभवेत् ३२ एतेषां पंचमार्गा
णां मध्ये पीठादिरोहणं यः करोतीति दासोहं गुरुरित्यभिधीयते ३३ शेषाश्चत्वारआ

चार्यः उपदेशश्च साक्षिणः उपदेशानंतरं तेषां आचार्यतनिर्हि ४४ पट्टाभिषेचनविधिं ब्रु
हि मे महाभि सांप्रतं सिंहासनाधिपतये शिखामुद्रादिसंयुतः ४५ पंचमुद्रांचितो भूत्वा गु
रुः पट्टाभिषेचनं पूर्वोक्तविधिना सम्यक् गुरोपदेशं स्वगोत्रजं ४६ स्वशाखिं च स्वगोत्रं
च स्वरं उकलशांचितं संविदित्वा यथाशक्ति कुर्यात् पट्टाभिषेचनं ४७ स्वशाखा च स्वगो
त्रं च स्वसूत्रकलशानि च जटाकाशायदंडेषु चैकहीन हि पूज्यते ४८ तस्मादेतल्लक्षण
नि पूज्यानि च वरेण नवे वर्णः भीः संमतो यस्तु गुरुत्वेन निहितः पुमान् ४९ पट्टाभिषेकोव
हुभिः संपूज्या गुरु विना परः पार्वत्युवाच पट्टोपदेशयोर्मध्ये प्रबलो दुर्बलश्च कः ५० एतद्विस्ता
र्य भगवन् वक्तुमर्हसि सांप्रतं ईश्वरोवाच उत्तमः पट्टबद्धस्यादुपदिष्टः स्तताधमः ५१ उप
देशः परो नाभून्न विपट्टाभिषकर्तृः तस्माद्दीक्षा पट्टबद्धो गुरुरेव न संशयः ५२ पार्वत्युवा

गोत्रादिकस्सर्वोपुत्त्रं गुरुत्वेन प्रतिष्ठितं हित्वान्यन्यमजस्तेषस्तु ते पापफलप्रदं ४३ ईश्वरो॰
ऽन्यशाखाप्रसूतस्य दीक्षितस्यापि भामिनी न तस्य गुरुपीठाधिकारः शिवः प्रशस्यते ४४ स्वशा
खासु प्रसूतश्चयस्यान्यत्रोपदेशतः गुरुपीठाधिकारस्तु नास्ति जन्मशतैरपि ४५ पट्टबंधनमे
कस्य कृत्वा कालांतरे यदि त्वदन्यस्य स्वगोत्रस्य त्वदन्यगोत्रस्य वा पुनः ४८ यपट्टबंधं कुर्वंती
तेषां ते ध्रुतमेध्रुवं पूर्वस्मादन्यगोत्रं वा पुनः संस्कारान्नु हुः ४९ ये पट्टबंधं कुर्वंती तेषां मध्यतः
मो भवत् पार्वत्योवाच पूर्वपट्टाभिषिक्तस्य महिमानं श्रुतो न चा ५० इदानीं श्रोतुमिच्छामि
तस्य माहात्म्यमंजसा ईश्वरोवाच कृतयुगानां प्रवरं स्तीर्थानां ज्ञानं च यथा ५१ शास्त्राणां
तु यथा वेदा देवानामीश्वरो यथा ग्रहाणां च यथा सूर्यो वर्णानां ब्राह्मणो यथा ५२ पुत्राणां
च यथा ज्येष्ठः पुत्रेचारोऽप्यपाहिता धेनुनां कामधेनुर्गजा॰

श्रे एव तो यथा ५२ रसानां लवनश्रेष्ठ अंगानां मस्तको यथा इंद्रियाणां यथा नेत्र सुंदराणां
च मन्मथं ५४ वृक्षाणां बिल्ववृक्षश्च पत्राणां तुलसी यथा विवाहाणां यथा लिंग नक्षत्राणां य
था गुरुः ५५ तथा पूर्व पट्टबंधः स पुन्नामुविसर्वतः पूर्वस्मिन्पट्टबंधोपः बन्हनामपि संमतः ५६
स एव लोके पूज्यस्यो दर्शनं तस्य मुक्तिदं पादस्पर्शनमेतस्य तीर्थस्नानफलं भवेत् ५७ तेनैव स
हसंलापं पंचाक्षरजपो भवेत् तस्मात्प्रथमबद्धश्च सर्वेषामुत्तमो भवेत् ५८ तस्मात्तत्क्षेत्र सं
जातशिष्यैस्तं परं पूजयेत् अपूज्य परत्वात्तच्छिष्या नरकान्नेव विंदते ५९ कदाचित्तं विहायायः
द्वितीयं यदि सेवते ते सर्वे नरकं यांति यावदिंद्रचतुर्दश ६० एतद्दूरं विहायाय प्रमदादभिमान
ता धनाशया पट्टबद्धं ये कुर्वंति द्वितीयकं ६१ ते नराः कुरुकाः प्रोक्ता पश्यंतः सद्गुरा अपि ए
तेषां त्रिविधानां तु परिशंदर्शने भवेत् ६२ ते यांति नरकं घोरं यावच्चंद्रदिवाकरौ स्वयमेवाभि

षित्कोयः पूर्वपट्टस्यनंतरं ६२ आसमंतश्च पूर्वश्च सयातिनरकंध्रुवं द्वितीयपट्टबद्धस्ययदि
संदर्शनंभवेत् ६४ स्नानयोनिशतंप्राप्य पश्चाद्द्वरवमश्नुते पूर्वप्रतिष्ठितंलिंगंबिल्वव
क्षमथापिवा ६५ छद्रिणांचयत्प्राप्तंतत्रतेनभवेन्नरः इतिश्रीमन्महावीरशैवागमनमुदीरि
तं ६६ येश्रृण्वंतिनराःसर्वेपठंतिचपुनःपुनः तदुक्तमनुकुर्वंतितेषामीशःप्रसीदति ६७
इतिश्रीमन्महावीरशैवागमेएकोशतितमोध्यायः ५१७ श्रीशंकरायनमः उपसूत्राणि
लिख्यते महासूत्रोद्भवानिचहारुकस्यविलासेनदृष्टिसूत्राणिद्वादश १ कौपीनःस्वर्ण
कंथश्चसिंगिमसणिरेवच उद्धारश्चतथानंत्रीकुटारश्चामरीतथा २ कपाटकुक्षिकं
पश्चज्वलत्कंथातथैवच श्रृंगीश्चैतेद्वादशांचेदृष्टिसूत्रासमुद्भवा ३ शंकुकर्णवि
लासेनलंचकाद्वादशाअपि त्रिपुटीरज्जुकंथाश्चकोटिभस्मस्तथैवच ४ रौप्यंकोटि

चद्रगुडोमरुकधोप्यलकएवच वसनोमुंडीखंडिश्चलंबसत्त्वाष्मुभ्भवाः ५ रेणुकस्यविला
सेनपडवडेद्वादशाअपिपुराणःपंचकेथस्यषडंगःसुरगितथा ६ मरुपिदिगंवरश्चैवः
वेणिभिनस्तथैवच मोरटश्चैवनाटिश्च गौरिमुसलिकस्तथा ७ पडवंश्चैवसंजाताश्चो
पसत्त्वाश्चविसतः धेनुकर्णविलासेनमुक्तगुच्छाश्चद्वादश ८ गोणिकंथास्तथादंतिजटि
लोत्रिगुणिस्तथा मुक्तगुच्छो केशिकंधोललाटश्चवोव्याघ्रलोचनस्तथा ९ भगिनीजा
लकंपश्चनटनोचोदडिस्तथा मुक्तगुच्छासमुत्पन्नाश्चैतेद्वादशविसृता १० विम्बकर्णवि
लासेनपंचवर्णाश्चद्वादशां कंबलीवृषभश्चैवदशमुखोरज्जुकंपकाः ११ विधिपंचू
मुखश्चैवगोचरोगगनस्तथा मुसंठीलकुटिश्चैववलिपिलिपतिस्तथा १२ पंचवर्णा
न्महासत्त्वानूदुपसत्त्वासमुभ्भवा एकैकस्मान्महासत्त्वानूदभुताश्चैवसर्वशः १३

अंतर्भूता महासूत्रे ष्वेते द्वादशसंज्ञकाः मरुत्तामुपसूत्राणां नवाधाश्चाधिका
रिणः २४ इति श्रीपाशुपततंत्रोक्तमहात्मविरशैवगोत्रादिनिर्णयः समाप्तम
स्तु ॥ श्री क्षेत्री संपूर्णमस्तु ॥ श्रीगौरीशंकरार्पणमस्तु ॥ शुभं भवतु ॥ ९ ॥
॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥